पूर्वोलकारोरेफमापद्यते॥लुप्यतेयवर्णपूर्वोयवकारोदृतियवकारोलुप्यते॥नकारस्यरे २९
फःपकारंवा॥लुप्तेचमलोपात्पूर्वस्वरोनुनासिकइति॥आकारस्यईकारस्यचानुनासिकत्व
मितिसर्वंसुस्थं॥पवमानःसुवर्जनइत्यस्मिन्नुवाकेप्रथमामृचमाह॥पवमानःसुवःपु

नातुमा॥योदेवःपोतासर्वेषांशोधयितासदेवः अपवित्रेणशुद्धिसाधनेनास्मदी
यजपध्यानादिनामांपुनातुशोधयतु॥कीदृशःपोतावेपमानःशोधनकुशलःसुव
र्जनःस्वर्गएवोत्पन्नःविचर्षणिःविविधशोधनप्रकाराभिज्ञःपुनंतुमान्यवःदृतियेकल्पा
दौस्वर्गलोकेपुसमुत्पन्नत्वेनदेवरूपाजनाःयेचस्वायंभुवमनुप्रभृतयःऋषयःयेपिस्व
कर्मवशान्मनुष्यलोकमायंतीस्यायवोमनुष्याःसदाचारपराःशुभ्रवांसःतेविश्वेसर्वेपि
धियानुग्रहबुध्यामांपुनांतुजातवेदःपवित्रंनुदृतिहेजातवेदःउत्पन्नजगदभिज्ञअ
ग्नेदेवशुक्रेणदीप्यत॥भासत्रदीप्याभासमानःवक्रत्रंनु॥अस्मदनुष्ठेयान्कर्मविशे
षाननुसृत्यपवित्रेणकृत्वाशोधकेनलक्षणेनपवित्रवदस्मदनुष्ठितंकर्मशुद्धियु
क्तंयथाभवतितथामांपुनाहीशोधय॥यत्तेपवित्रमर्चिषीतिहेअग्नेतवार्चि
र्ज्वालायामंतरामध्येवितंविस्तृतंयत्तवित्रंशुद्धिसाधनंब्रह्मयद्दीप्तिमस्तितेनव

यंपुनीमहे॥उभाभ्यांदेव॰महेसवितर्देवत्वदीयेनसवितरेशुद्धिसाधनेनयज्ञसवः कर्मसम्
द्धियंप्रेरणंताभ्यामुभाभ्यांमिदंब्रह्मपरिदृढंकर्मपुनीमहे शोधयामः॥विश्वदेवापुनती॰रयी
णामितिसर्वेदेवसंबंधिनीयादेवी शोधनकुशलासास्मान्पुनंती शोधयंतीआगात्आगच्छ
तु॥यस्येयस्यादेव्यास्तनुवःशुद्धिहेतवोदेहविशेषाः वीतपृष्ठाः कांतस्तुतयः तयादेव्यानुगृही
ताःसधमाद्येषुऋत्विग्भिःसहहर्षयोग्येषुकर्मसुमदंतोहृष्यंतोवयंरयीणांधनानांपतयः
स्याम॥वैश्वानरोरश्मि॰यज्ञियेमापुनीतांइति॥विश्वेषांनराणांहितोग्निरादित्योवादेवः स्व
कीयरश्मिभिःमांपुनातुवातोवायुःप्राणेनेषिरःप्राणरूपेणदेहेषुगच्छन्मयाभूः सुखस्यभाव
यिताभवतु॥द्यावापृथिव्योर्यत्तावरीसत्यवत्योयज्ञियेयज्ञायहितेसंत्योपयसाजलेनप ३०
योभिःक्षीरादिसैरेश्वर्यैमापुनीतां॥बृहद्भिःसवितस्त॰दक्षैःपुनाहिमेतिहेसवितःकर्मसुमे
रकअग्नेदेवमन्मभिःमननैरस्मदनुग्रहविषयेमांपुनाहीकीदृशैःबृहद्भिःमहद्भिरादरयुक्तैः

स्तुभिःपापतरणसाधनैर्वाषिष्ठैश्चिरकालानुवृत्त्यावृद्धतमैर्दक्षैः शोधनकुशलैःयेनदेव॰
पुनीमहेइति॥येनशुद्धिसाधनेन।देवान्देवान्यजमानानपुनते॥कथंगताभिनिष्पादितोरु
त्सन्नसंस्कारोतःकथंसन्शोधनतांवाद्वैयेनशुद्धिसाधनेनापोदेवताःदिव्यंकर्मापुनतद्विद्
धेकविषयंगतिंशोधितवंतःदिव्येनश्लोकयोग्येनब्रह्मणापरिदृढेनतेनशुद्धिसाधने
नेदंब्रह्मानुष्ठीयमानंपरिदृढंकर्मपुनीमहे॥यःपावमानी॰मातरिश्वनोतियःपुमान्पाव
मानीःशोधकदेवतासंबंधिनीःएताऋचःअध्येतिपठतिअर्थतःस्मरतिवासपुरुषःसर्वे
रसंसारभूतंफलमश्नातिभुंक्ते॥कीदृशैरसंऋषिभिःसंभृतंमंत्रैस्तदभिज्ञैर्मुनिभिश्चसंपा
दितं॥अतएवशुद्धंमातरिश्वनावायुनाचोदितंस्वादुरूपं॥पावमानीर्यो॰मधुदकंइ
तियःपावमानीरध्येतितस्मैपुरुषायसरस्वतीरसंदुहेकीदृशैरसंक्षीरादिरूपं॥॰पावमा
नीःस्वस्य॰हितंइति॥याःपावमान्यःऋचःनाःस्वस्ययनीःक्षेमप्रापिकाःसुदुघाःसुदुघफलं

दुहानाः पयस्वतीः क्षीरादिरसहेतवश्च भसिधास्ता अस्माननुगृण्हन्तिनिर्दोषऋषिभि
र्मंत्रदृग्भिः मुनिभिः रसः फलसारः संभृतः अस्मासुसंपादितोस्त्रब्रह्ममंत्रास्तावत्कात्र्याम्नाः
तेषुस्मासु अमृतमविनाशिफलंहितंसंपादितमस्तु ॥ पावमानीर्दिशः माभृताद्दन्ति ॥ स
र्वैरिंद्रादिभिः समाभृताः संपादिताः पावमानीर्देवीः पवमानमंत्राभिमानिन्योदेव्यः नोस्माकं
लोकहृदयंदिशंतुभयंछंतु ॥ तत्रस्थान्कामान्भोदर्थंसमृधान्कुर्वंतु ॥ पावमानीस्स्वस्य० घृत
श्चुतः पूर्ववत् ॥ येनदेवाः पवि० पुनंतुमाद्दन्ति ॥ देवाद्दद्यधाः येनपवित्रेणशुधिसाधनेन
सदासंदेहंशोधयंतिसहस्रावांतरभेदयुक्तेनतेनसाधनेनपावमान्यः ऋचोमांपुनंतु ॥
प्राजापत्यंपवि० ब्रह्मपुनीमहेद्दति ॥ यत्पवित्रंशुद्धिसाधनंप्राजापत्यंप्रजापतिसंबंधिनं
शतोद्यामंदर्भैर्निर्मितत्वात् शतसंख्याकैः उद्यमैर्नाडिभिः युक्तंहिरण्यंपापहरणसाध ३१
नेनद्रव्येणनिर्मितंतेनत्वाद्दशेनपवित्रेणब्रह्मविदोवेदार्थविदोवयंपूतंब्रह्मपूर्वमापिशु

द्धपरिदृढंकर्मपुनीमहेभूयोपिशोधयामः ॥ इंद्रः सुनीती० जयंस्यापुनातुद्दतिरिंद्रः
सुनीत्याशोभनफलप्राप्तिकयादेव्यासहमांपुनातु सोमः स्वस्त्याक्षेमप्राप्तिकयादेव्या
सहमांपुनातुवरुणः समीच्याअनुकूलयादेव्यासहमांपुनातुयमोराजाप्रमृणाभिः प्र
कर्षेणमारिकाभिर्देवीभिःमांपुनातुजातवेदाः ऊर्जंयंस्याक्षीरादिरसप्राप्तिकयादेव्या
सहमांपुनातु ॥ एवंमार्जनंविधायततः पापपुरुषनिर्गमनायदक्षिणकरेजलंनिधाय
नासिकायंत्राप्यवामभागेभेदिन्यांनिक्षिप्यतज्जलंनावलोकयेत् ॥ तदुक्तंवसिष्ठे ॥ गृ
हीत्वापाणिनावारिस्वनासाग्रेलोकामृत्संपतेत् ॥ उद्धृत्यदक्षिणेहस्तेजलंगोकर्णवत्कृते ॥
निधायनासिकायेतुपापपूरुषंचसंस्मरेत् ॥ विभृत्यानासिकायांतुनिरुद्धप्राणमारु
तः ॥ वामेनिक्षिप्यभेदिन्यांतज्जलंनावलोकयेत् ॥ तत्रैवानिरुक्तमंत्रमाहद्रुपदादिव ॥
मांएनसःमुंचंतुकर्मसाक्षीसूर्यइत्यर्थः ॥ तत्रानिदर्शनंद्रुपदादिव ॥ अपराधीनांपादे

कीर्तितकाष्ठेऽनुपदं ॥ चोरादीन्निरोधुंग्रामंमध्येदारुमयं पादकीर्तंनिधायग्रामं
स्वामिनःस्थापयंतीतिभूसिद्धिः॥ तस्मादिवेत्यर्थः॥ यथाकृपालुःस्वामीत्मानंधानाद्
पराधिनंमोचयतितद्वदिहिभावः॥ किंच॥ आपःएनसःपापात्मामांशुंधंतु॥ अस्मिन्
र्थेत्रयोदृष्टांताःकथ्यंतेऽनुपदात्॥ पादकीर्तितकाष्ठादिवेन्मुमुचानःमुक्तवान्सन्नः स्नेह
क्लेदवान्॥ स्नात्वीत्यात्वा॥ हृदयश्वेतिनिपातःमलात्सर्वशरीरव्यापिनःकात्मुक्त
इवंपुनात्यनेन॥ आज्यादिकमितिपवित्रंपुनःसंज्ञायामितिप्रत्ययः॥ तेनपवित्रेणसमु
साःयदभैरूपेणसमोसाग्रोदर्भोभादेत्रामात्रोपवित्रीकुरुतइतिश्रुतेः॥ पवित्रंवेदभो
इतिश्रुतेश्च॥ तेनधूतंशोधितंआज्यंस्थाल्यामाज्यंनिरुप्येत्यारभ्यउद्गग्राभ्यांपवित्रा
भ्यांपुनराहारमाज्यंनिरुप्यनातीतिन्यायेनोक्तविधिनासंस्कृतमाज्यंसर्पिरेवेति॥ एत
त्सर्वंतद्दोषाद्विनियुक्तःस्वयंयथापरिशुद्धोभवति॥ तथामांसर्वस्मादेनसःशोधयंवि

SHRI SHRI ANANDAMAYEE CHARITABLE TRUST
SHRI BHAU DAJI
WELCOME TO LIBRARY

तितात्पर्यार्थः॥ इतिकारिकाकारः॥ अद्भ्योजातेोक्त्यपेक्षयाग्निर्वैधृतिवाउवे॥ गर्भंयाद
धिरेनानारूपासोतिवद्योनतु॥ शंतुःवंश्रमयित्वानःस्योनाःसंतुसुखप्रदाःयासांमध्येद
उधरःपुण्यपापेविवेचनं॥ वरुणोयातिमधुरःस्यंदिनःपूर्ववत्परं॥ यासाममृतरूपा
णांभक्षणंकुर्वतेमराः॥ हृद्यासनावकुविधाखेचयाःधार्थिवामपि॥ पयसातद्वताकारं
रुदंतीनिखिलोकिकाः॥ शुक्राविशुद्धालाआपः शंतुदाःसंतुशंमयाः॥ आपःकल्याणद
श्यामंभूतस्यादतिपश्यत॥ तनुवासौम्यथामूर्त्यापश्यतोगंचमामकं॥ आहूयाम्याक्ष
पदतोवन्द्यान्वोवाउवादिकान्॥ आपोयूयंयद्गोवर्चोबलमोजोनिधत्तवे॥ एतत्सर्वंसमा
नंस्यात्संध्यानोचत्रयेपितु॥ जलमाहरनमंत्रास्तुवर्णितास्तविशोधनः॥ आपोहिष्ठेति
नवभिर्मार्जनंसर्वमीरितं॥ पश्चादपिचसर्वंपामितरेषांतुमार्जनं॥ उक्तंचवसुकर्तव्यं
शिष्टाचारानथेवाद्य॥ प्रातःसंध्यामुपासित्थेप्रातःसंकल्पइरितः॥ मध्येमाध्यांह्निकं

संध्यामुपासिष्यदितीरितः ॥ सायंविहितसंध्यायाः संकल्पः सम्यगीरितः ॥ अत्रविघा
रण्यस्वामिभिरुक्तंमाधवीये ॥ अथातःसंध्यावंदनविधिंव्याख्यास्यामस्तीर्थंगत्वाप्रयतो
३३ भिषिक्तःप्रक्षाल्यपाणिपादावाचम्याग्निश्चमामन्युश्चेतिमातः सावित्र्यास्त्वमिमंव्यूहं व
गाभिर्हिरण्यवर्णीयाभिः पावमानीभिरन्येर्ऋग्भिश्चपवित्रेमंचेरात्मानंप्रोक्ष्यप्रयतो
भवतीति ॥ अथार्घ्यप्रदानंकर्तव्यंतदुपयुक्तमंत्रस्तुअनुपदमेवव्याख्यायते ॥ माध्या
ह्निकसंध्यायामर्घ्यप्रदानविनियुक्तमंत्रमाह ॥ हꣳसःशुचिषदिति ॥ हꣳसऋति ॥ आह
वनीयादिप्रदेशेपुण्यापकृतयागछतीतिहꣳसः परमात्माहꣳसोनामसदाशिवऋतिवृत्त
६ नात् ॥ सतुकीदृग्रूपेक्षयाह ॥ शुचिषदितिशुचौदेशेअविमुक्तादिपुण्यक्षेत्रेसी ३३
दतीतिशुचिषत् ॥ क्षेत्राणांपतयेनमऽइति ॥ अत्रतथादेशेनात् ॥ वसतिआत्मैजगं न्
तीतिवसुः वासनाद्वासुदेवेशिवासितंतेनजगत्रयमितिस्मरणात् ॥ अंतरिक्षसदितो

नि

रंतरिक्षसत् ॥ योऽंतरिक्षेतिष्ठतीतिश्रुतेः ॥ होताअग्निरूपेणदेवानामाह्वयिता
वह्निस्तद्रूपऋत्यर्थः ॥ अग्निर्वैदेवानांहोतेतिश्रुतेः ॥ वेद्यांभूलोकादेर्व्यापकत्वेनसीदता
तिवेदिषत् ॥ सावाऽएषꣳसर्ववेदोयदिरितिश्रुतेः ॥ वेद्यांपरिष्कृतभूम्यांतिष्ठतीतिवेदिषत् ॥
वेदिःपरिष्कृताभूमिरितिकोशात् ॥ वेदिर्वैपरोक्षंदक्षिणाऽइतिश्रुतावेद्याःसर्वोत्कृष्टत्वाव
गमात् ॥ तत्रैवंपरमात्माऽविर्भावायुक्तऋतिभावः ॥ अतिथिःसदृक्षंतदुक्तंस्वर्गधर्मयु
क्तंकुटुंबिनंअभिगछतिधर्मपुरस्कारेणान्यप्रयोजनःसोतिथिर्भवतिऽइतिधर्मपुरस्का
रःकृत्वाप्यनुष्ठानंतात्पर्यार्थंयत्नपरऋत्यर्थः ॥ केचिदभ्यागतऋतिवदंति ॥ तेषांत्वभ्या
गतःस्वयंविष्णुरितिहेतोर्थः किंतुवर्णितएवार्थः ननुअभ्यागतपदमपितथाविधार्थवा
चकंनान्नमात्रार्थवाचकमितिचेन्नसंज्ञाभेदेपिसंज्ञाभेदादितिसारं ॥ दुरोणेषुगृ
हेषुसीदतीतिदुरोणसत् ॥ अजस्रोदाद्दिनोदुरोणऽइत्यत्रदुरोणशब्दस्यस्थानपर

१ तिवचनमेवोदहृतं तन्मनोस्य अन्नमात्रार्थित्वात् अतिथेस्तुतस्मिन्नलक्षणलक्षितत्वेनतद्विलक्षण
त्वात् तस्मान्नान्नमात्रार्थीअभ्याग॰

लेदर्शनात्॥ब्रह्मांडाख्यगृहवर्तीत्यर्थः॥नृषुमनुष्येषुवैश्वानरब्रह्मनमेवोदाहृतंतन्नत
स्वन्नमात्रार्थित्वात्॥अतिथेस्तुतस्मिन्नलक्षणलक्षितत्वेनतद्विलक्षणात्ततस्मात्तमेनंत्रायस्व
आरूपेणसीदतीतिनृषत्॥अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितइतिस्मृतेः॥वरेश्रेष्ठेती
थोदोसीदतीतिवरसत्॥नमस्तीर्थ्यायचेतिश्रुतेः॥यद्यपिशुचिषदित्यनेनैववायमर्थोल
ब्धस्तथाप्यादरार्थमुपन्यासःमंत्रेषुजातमित्यादिनाआस्तीतिभागुरिश्चेतिभावः॥ऋतंयज्ञः त
न्निषादकत्वेनसीदतीत्यृतसत्॥व्योमिसूर्यात्मनासीदतीतिव्योमसत्॥अब्जनलक्षणजा
यतेइत्यब्जाःगोश्रुतिर्घृक्षित्यादिश्रुतेः॥जनसनखनक्रमगमोविधिविडौनुनासिकस्यात्
इतिनकारस्यादेशः॥गोषुअंतर्यामिरूपेणभवतीतिगोजाःपशुपतयइतिश्रुतेः॥ऋतेयज्ञेभोक्तृ
त्वेजायतइत्यृतजाःभोक्तारंयज्ञतपसामितिश्रुतेः॥अद्रिषुपर्वतेषुजायतइत्यद्रिजाःयःस
र्वेषुचभूतेषुनिधनूइतिश्रुतेः॥ईड्यःपरमात्माबृहत्पूजार्थकंऋतंउपासनात्मकंयोनि

ष्यादयतीतिशेषः॥अनसजलेनपाणिनाग्निंप्रदक्षिणमनुव्रजनेकर्तव्येयंप्रदक्षिणंम
कमंतीतिश्रुतेः॥असावादित्यमंत्रेणसोदकेनचपाणिना॥प्रदक्षिणमनुव्रज्ययाचयेत्संध्य
योरहोरोः॥इत्यपलक्षणं॥संध्यानामितिनेयं॥अतएवसंध्यात्रयेपिसमानं॥तथैवआचा
रात्॥तत्रविनियुक्तमंत्रमाह॥असावितिप्राणिनांनिर्देशः॥असावादित्योब्रह्मेति॥ब्रह्मैवस
न्ब्रह्माप्येतियएवंवेदेतिश्रुतेः॥अत्रेदंरहस्यंप्रकाश्यते॥कालत्रयेऽर्घ्यप्रदानंकर्तव्यं॥तत्रसा
यंप्रातःकालयोरर्घ्यत्रयंकर्तव्यं॥मध्याह्नेत्वेकमेव॥केचिदेकार्घ्यमाचरंति॥इ
दंचयथाकालंकर्तुमशक्यंचेत्कालेत्वतिक्रांतेप्रायश्चित्तंयाचमाणायामः॥अर्घ्यमक्षेपश्चक
र्तव्यः॥उभयोःसमुच्चयःप्राप्ततुविकल्पइत्युक्तमधस्तात्तत्रायंप्रयोगःविधिवदाचम्ययथा
शक्तिप्राणानायम्यममसायंसंध्याकालातिक्रमेणदोषपरिहारार्थंप्रायश्चित्तार्घ्यपूर्वकमर्घ्य
प्रदानंकरिष्यइतिसंकल्प्यसश्चिरस्कयासव्याहृतिकयागायत्र्यानुतनोदकेनार्घ्यमेकंदद्यात्॥

नचैवं प्रायश्चितकरणे प्रमाणाभावः ॥ नियमातिक्रमेऽन्यस्मिन्निति सूत्रकारकवचनात् ॥ प्राणायामः प्रायश्चिततयाकार्यः ॥ आचांतो विधिवत्प्राणानायम्यचतुरर्घ्यकालातीतविशुध्यर्थंदत्वासंध्यांसमाचरेत् ॥ स्मृतिश्चतुरर्घ्यदेयमितिविवेकः ॥ यथाकालमनुष्ठाने एकः प्राणायामः कार्यः संध्यादावर्घ्यदानेच प्राणायामैकमाचरेत् ॥ दित्युक्तं ॥ षट्कर्मचंद्रिकायामपि ॥ एवंसमाजनंकृत्वाद्विः शुध्यर्थंकारकं ॥ अतोभ्यंतरशुध्यर्थंप्राणायामंसमाचरेत्इति ॥ तत्रायंविधिः ॥ यदानिषिद्धसंध्यावंदनंक्रियतेतदाप्रायश्चितार्घ्यंएकंदातव्यंतदनंतरंत्रीण्यर्घ्यानिदातव्यानितत्रप्रायश्चितार्घ्यप्रदानात्पूर्वमेकप्राणायामःकर्तव्यःपुनःप्रधानार्घ्यप्रदानकालेपिनैवकार्यः ॥ एकप्राणायामश्चमादावेवप्रधानार्घ्यस्यापिप्राणायामपूर्वकत्वसंभवात् ॥ यथापवमानप्रसर्पणेध्वर्युप्रमुखाःप्रसर्प्यंतेइतिएकेनैवाध्वर्युणाप्रसर्पणेध्वर्युःप्रमुखाभवंति ॥ यथाआश्वलायनसूत्रेब्रह्म ३९

यज्ञप्रकर्णेऽपूर्वाव्याहृतयइतिएकप्रणवमादायसर्वासांव्याहृतीनांनारायणायानमःप्रणवपूर्वकत्वं ॥ यथाऽभयारण्यदर्शनपूर्णमासयोरंकामन्वारंभणायामादावेवारंभकत्वेनहूयमानेपीतिनकोपिदोषः नचोभयोरप्राणायामानुष्ठानमनुबाधकाभावादितिवाच्यंवचनाभावात् ॥ कल्पनायांऽपपत्तिर्बीजंचाऽस्ति ॥ तथाहि प्रथममाचम्यप्राणायामंकृत्वाप्रायश्चितार्घ्यदानंकरिष्यइतिसंकल्प्यततोधार्घ्यंदत्वापुनरुपविश्यपुनराचम्यप्रधानार्घ्यंदेयमितिवाच्यं ॥ नह्यत्रविशिष्टाचारोदृश्यते ॥ तस्मादुपपत्तिर्बीजंचाध्यं मंतद्दृश्यतइति ॥ अस्मदुक्तमेवसम्यक्समर्थनायप्रयोगःवर्णितस्तथाचम्ययथाशक्तिप्राणायाम्यदेवांकात्रावनुर्कार्त्यपूर्वकसंकल्प्यजलंगृहीत्वोत्थायसर्जेत्यंगुष्ठयोरंगंयथातथाप्राणायामंकृत्वार्घ्यदत्वासायंप्रातश्चार्घ्यान्दद्यात् ॥ अत्रस्मृतिवचनानि ॥ भाऽङ्गुरवःसंतर्विभःसंध्यावंदनमाचरेत् ॥ अर्घ्यप्रक्षेपणंकुर्यात्सायंतृप्तविनाभवि ॥ पाणिभ्यांज

रुमादायगायत्र्याचाभिमंत्रितं ॥ गोशृंगमुद्धृत्यजलमध्येजलंक्षिपेत् ॥ जलेत्वर्घ्यप्रदानंस्यं
जलाभावेतुतत्रैव ॥ संप्रोक्ष्यवारिणासम्यक्पश्चादर्घ्यंत्रयंयथाविधि ॥ अत्रापिदानव्यमित्य
न्वयः ॥ इदंवचनंप्रातर्मध्याह्नकालार्घ्यप्रदानविषयं ॥ तदुक्तं ॥ उपविश्यतुसायाह्नेजलेर्घ्यंननिक्षिपेत् ॥ निक्षिपेद्यदिमूढात्मारौरवंनरकंव्रजेत् ॥ सायमुपविश्यवारिणासंप्रोक्ष्य
भूमावर्घ्यदानंकार्यंनजलेइत्यर्थः ॥ तदुक्तंचस्मृतौस्मृतिसंग्रहकारेणसायंनिष्ठोर्घ्यविधा
नेशखांतरविषयं ॥ सायमुपविश्यैवार्घ्यदानंकुर्यात् ॥ भक्षेपणानंतरमुत्थायाङ्गिरास्मानं
परिषिच्यप्रदक्षिणंकृत्वैवोपविश्याचम्यइति ॥ मध्याह्नेतुयथाकालमेवार्घ्यदेयं ॥ काला
तिपतौएकंप्रायश्चित्तार्घ्यदेयमितिविवेकः ॥ मध्याह्नेचाजलक्षेपेसकृदेवसमाचरेदि
तिवचनात् ॥ नचमध्याह्नेप्रायश्चित्ताभावःशंकनीयः ॥ चतुरर्घ्यंतुगायत्र्याशिरोव्याह
तिसंपुटं ॥ कालातीतविशुध्यर्थंत्रिसंध्यासुसमाचरेदितिवचनेनसंध्यात्रयेपितद्

नुष्ठानविधानात् ॥ अत्रायंविशेषः ॥ मध्याह्नकालेब्रह्मयज्ञात्पूर्वंमापस्तंबीयानां
संध्यावंदनंकार्यं ॥ यथाप्रातरुपासनाद्यनुष्ठानानंतरंब्रह्मयज्ञःप्रोक्तोतिदामध्या
ह्निकंकृत्वैवब्रह्मयज्ञःकर्तव्यःतथैवशिष्टाचारात् ॥ स्मृतिकारसंमताच्च ॥ आश्वलाय
नशाखिनांतुमध्याह्निकसंध्यावंदनात्पूर्वंब्रह्मयज्ञःकार्यः ततोमध्याह्निकंकुर्यात् शौन
कःमध्याह्नेतुपुनःस्नात्वाब्रह्मयज्ञंसमाचरेत् ॥ ततोमाध्याह्निकंसंध्यांकृत्वानुग्रहमावि
शेत् ॥ किंचसएवाह ॥ यस्यनिष्पादनंप्रातर्मध्याह्नात्साविशिष्यते ॥ मध्याह्नेब्रह्मयज्ञंते
कुर्यादित्याश्वलायनः ॥ तत्रमध्याह्नश्चेन्मुख्यकालोमध्यमः ॥ स्नानकर्मणीतिवचनात् ॥
मध्यमामाध्याह्निकीसंध्यास्नानकर्मणिमध्याह्नकालइत्यर्थः ॥ तत्रगौणकालः ॥ संध्यामा
ध्याह्निकायनरातितथा ॥ माध्याह्नेतूत्तमाप्रोक्तासंगवेमध्यमास्मृता ॥ पराह्णेत्वधमाप्रो
क्तमाध्याह्नीत्रिविधामतेति ॥ तर्जन्यगुष्ठयोगेनार्घ्यदानेनकार्यमित्युक्तं ॥ स्मृत्यंतरे ॥ तर्ज

स्यगुप्तयोगेनराक्षसीमुद्रिकाभवेत्॥ योदद्यात्तयाचार्घ्यंतत्तोयंरुधिरंभवेत्॥ एवम
र्घ्यंप्रदानंकुर्यात्प्रदक्षिणमनुव्रज्याचामेत्॥ तदुक्तं॥ मंदेहानांविनाशायनिक्षिपेत्पुजलांजली
न्॥ प्रायश्चित्तार्थमाचम्यमुच्यतेदेवइत्यपि॥ अथसंध्यांगतर्पणं॥ कार्यंशिष्टाचारात्॥
तदुक्तमाह्निके॥ ऋमासंध्यांचगायत्रींब्राह्मींचनिमृजंतथा॥ तर्पयामिचवक्ष्यंचतस्मादे
वताभितिहृति॥ अत्रकेचिदस्नोपसंहरणादिकं कर्तव्यमितिवदंतितन्मौढिकंसंध्याविष
यंनतुसंध्याविषयंप्रत्यक्षवेदेतथानुक्तत्वात्॥ तन्नाश्वलायनास्तंबविषयमितिचेद्विका ५
थामुक्तं॥ तस्मान्नकर्तव्यमितिसर्वंसुरमणीयं॥ अत्रेदंविचार्यते॥ आशौचादौसंध्यावंद
नमर्घ्यांतमित्युक्तमधस्तात्॥ स्मृत्यंतरेविषयःकथितः संध्यामिश्चहोमंचयावज्जीवं ३०
समाचरेत्॥ नत्यजेत्सूतकेचापित्यजन्नाधस्ययोगतिं॥ एतद्वचनंमानसीसंध्याविषयंतदु
क्तंपुलस्त्येनसूतकेमृतकेचैवसंध्यावंदनमाचरेत्॥ मनसोच्चार्यमंत्रंप्राणायाममृतेद्विजः॥

मनसंत्यजेत्

नन्वेवमाशौचादौसंध्याकर्मनकर्तुंशक्यते॥ आशौचस्यकर्माधिकारप्रतिबंधात्॥ अ
शौचकालेनानुष्ठानंसंभवतीतियदुतदानीमशुद्धानंसंभवति॥ तत्कालिकाःशुद्धिसंभवात्॥
पंचयज्ञोपासनेतुविप्राणामंगशुद्धिश्चजायतेगोभिलः॥ अग्निहोत्रस्यहोमार्थंशुद्धिस्मार्ता
लिकिस्मृतेति॥ तन्नसूतकस्यतदयोगकालत्वात्॥ अतएवविष्णुपुराणे॥ संध्याकालउ
पस्थानंसंध्यायाःपार्थिवैष्यते॥ अन्यत्रसूतकाशौचाद्भास्करविभीतिरब्रवीत्॥ किंचसूत
कादोसत्वपिसामर्थ्यसंध्याकर्मनकार्यमित्याहमरीचिः॥ सूतकेकर्मणांत्यागः संध्याहो
मंविधीयतइति॥ अत्रब्रूमः॥ दुर्बलाद्दृतवचनबलेनतासांवाचांआचमनाद्यभिधारा
तत्कर्मरूपंसंध्याकर्मेत्यस्यविशेषतासमर्थकल्पनात्॥ अतएवपराशरमाधवीये॥ प्राणा
यामंविनामानसंकुर्वान्यत्कार्यमित्युक्तं॥ ननुव्याधितस्यकथमनुष्ठानमित्याकांक्षायांउ
च्यते॥ ज्वरितस्ययावदनुष्ठानाभावेप्यदोषात्स्वस्थस्यैवतन्नियमात्॥ यदाहयाज्ञवल्क्यः॥

सं०भा० अनार्तश्चोत्सृजेद्यस्तु सविप्रः शूद्रसंज्ञितः॥ प्रायश्चित्ती भवेच्चैव लोके भवति निंदि
तः॥ अत्रिरपि॥ नोपतिष्ठति यस्संध्यां स्वच्छविच्छाश्चवेद्विजाः॥ हिंसतेतेसदा विप्रा
३९ स्य भगवंतं दिवाकरं इति॥ नन्वस्योर्ते कागतिः॥ पित्राभ्रात्रावास्वानुष्ठानं कारयितव्यं॥
नतुसर्वात्मनालोपः॥ नित्यत्वात्॥ उक्तंच स्मृत्यंतरे उन्मत्तदोषयुक्तस्य व्याधितस्यच
नित्यशः॥ पित्राभ्रात्रातथान्येवा संध्यावंदनमाचरेदिति॥ अथ गायत्र्याः॥ ज्वरादि
नायत्किंचित्पीडितोभूत्वाधृत्वावाग्यतः समासीनस्त्रिपुंड्रधारणंकृत्वारणिनि
राचम्ययथाशक्तिसंध्यावंदनंकुर्यात्॥ रुग्णस्यतत्राचमनेनिषिद्धमित्याहापस्तंबः॥
तत्राभिधाकारुणादिति॥ कारुण्यज्वरादिकमितिवृत्तिकारः॥ ॥ इतिसंध्याभाष्ये
तृतीयोगुच्छः॥ अथगायत्रीजपात्पूर्वं॥ ओमित्येकाक्षरंब्रह्मेतिगायत्रीहृदयंपठनी
यंतदाहशौनकः॥ ॐ मित्येकाक्षरंब्रह्मेत्यतद्हृदयमुच्यते॥ गायत्र्यास्तत्तिस्रोवृज

पकर्मसमाचरेत्॥ इति॥ तदिदानीं व्याख्यायते॥ ओमित्येकाक्षरंब्रह्मेति॥ ब्रह्मपर
मात्मावाच्यवाचकयोरभेदः॥ तत्सर्वंव्याहृतिव्याख्यानावसरेनिरूपितंमयत्नात्॥ रूपनि
ष्पन्निश्चनिरूपितविशेषस्तुभगवत्पादीयमतानुसारेणप्रपंच्यते॥ प्रपंचसारंमंत्रशास्त्रम
करणेनिर्दिष्टं॥ योऽयंपरमहंसाख्योमंत्रः सोहमितीतिःगमेर्लोपेकृतेपूर्वसंधावोमितिजा
यते॥ अकारश्चतथोकारमकारश्चत्रिवर्णकः॥ इतिब्रह्मध्यायेन ओमित्येतज्जपेत्॥ तदा
कुर्भगवत्यारीयाः॥ ओमित्येकाक्षरंब्रह्मध्यायन्नेवजपन्द्विजः॥ अवाप्तसर्वकामोसा
वात्मनत्वायकल्पतइति॥ तस्यचस्थादिकंदर्शयंति॥ अग्निर्देवतेतिअग्नेतिशेषः॥ अग
निसकलदेवतांप्रतिपाद्यत्वंगछतीतिव्युत्पत्त्या अग्निशब्दस्यपरमात्मपरत्वं॥ अगिकृगिव
गीतिदंडनगात्॥ अग्रेर्गोपत्वेयोगादिसूत्रेणनिपात्ययः नलोपश्च॥ यादवानांनामधा
त्रीतिश्रुतेः॥ अग्यभगवत्यंशः परमात्मादेवता अधिदेवतेत्यर्थः॥ ब्रह्मऋषिः॥ गाय

Dr. BHAU DAJI

सं॰भा॰ ३९ च्छंदः गायत्री छंदः परमात्मस्वरूपं ॥ तदभिव्यक्तियोग्यस्थानत्वादितिभावः ॥ सायुज्यं विनियोगं सायुज्यविनियोगप्रकारार्थं ॥ तथाचैवंप्रकारेणवस्वरूपंजानीयादित्यर्थः ॥ तदुक्तंवरभगवत्पादैः प्रणवब्रह्मरूपः प्रोक्तंछंदोगायत्रमुच्यते ॥ परमात्मादेवतायंसायुज्यविनियुज्यतइति ॥ अतएवअग्निपदस्यपरमात्मस्वरूपंव्याख्यातं ॥ अथसकलवेदमातरंव्याख्यायते ॥ आयान्हिनिवरदाउपसकानांअभीष्टफलदात्रीतिदेवीनित्यानंदसंपन्नामातृकात्मिकेत्यन्ये ॥ आयातुअस्मत्सकाशमायान्त्वित्यर्थः ॥ अथतांस्तोतिअक्षरमितिअक्षररहितंनित्यंसमितंसम्यग्वेदांतप्रमाणेननिश्चितं ॥ ब्रह्मपरमात्मानमेवेतिद्योपःअनुतनः किंमुतआह ॥ गायत्रीमितिछंदसांवेदवेदांतानांजननीसकलवेदांतसारनिर्णेत्रीत्यर्थः ॥ तदुक्तंआपस्तंबस्त्वेसर्वेभ्योवेदेभ्यःसावित्र्यनूच्यतइतिहिब्राह्मणं ॥ तदाहमनुरपि ॥ त्रयस्त्रिभ्योहिदेवेभ्यः पादंपादमदूदुहत् ॥ तदित्यृचोस्याःसावित्र्याःप

रमेष्ठीप्रजापतिरित्यृषिरिति ॥ गायत्रीगायत्रछंदोभिमानिनीदेवतेत्यर्थः ॥ अथमार्थाहिनीयाहिनीयापाछंदसः ॥ इदंयत्कृतंस्तोत्ररूपंतपःब्रह्मतपोब्रह्मेतिश्रुतेः ॥ जुषस्वअनुगृह्णत्वमितिशेषःजुषस्वेतिलिंगात् ॥ गायत्रीत्वमागत्यमामनुगृह्यमदाचरितंस्तोत्रंजुषस्वसफलंभगवत्येसमर्पितंभावः अथवावरदेदेवीअक्षरंविनाशरहितंसमितंसम्यग्वेदांतप्रमाणेननिश्चितंब्रह्मजगत्कारणंपरमतत्वमुपदेष्टुंभावः ॥ आयातुआगच्छतुतेदेवैस्सृष्टयतिगायत्रीमितिछंदसांमातागायत्रीपदाभिधेयापरमदेवतामममइदंब्रह्मवेदांतप्रतिपाद्यंतत्वं ॥ जुषस्वउपदिशत्वित्यर्थः ॥ जुषस्वेतिछंदसांतुत्यफलमाहयदन्नादितिअन्नात् ॥ अन्हियत्सापंकुरुतेकरोतिति ॥ तत्सापंअन्नात्सतिमुच्यतेऽउपासकपुरुषाणामितिशेषः एतनयद्वाव्याहितिव्याख्यातं ॥ अथगायत्र्याःसर्वात्मकत्वंदर्शनेनसावित्र्यंपार्थयतेमत्वर्णइतिमत्वर्णमहादेवीतिसावित्र्याःसंबोधनंएतादृशंहेदेवीओजोसिमइंद्रियाणां

शक्तिरसि सहोसि शत्रूणामभिभवशक्तिरसि वरूथमसि शरीरसामर्थ्यरूपासि भ्राजो
सिदीप्तिरूपासि ।। देवानां अग्नीन्द्रादिदेवोधामतेजोदयासितदसितत्तेभामासितदेवत्रा
मेत्यर्थः ।। अथदेवानांधाम्नोवासभूमिः ।। असिभवसिनामेतिमसिद्वे ।। विश्वंसर्वंजगद्रूपंत्व
मेवासि ।। विश्वायुःसंपूर्णायुःस्वरूपासिएवंसर्वमसिसर्वायुरित्युक्तानुवादः यद्वाविश्वंसम
स्तंस्थावरजातंभवसिविश्वायुःस्थावरजातस्यआयुरपित्वमेवासि ।। अथायुःशब्देनसत्ताका
लोविवक्षितः ।। ननुमुखनासिकासंवलितंप्राणाख्यवायुसंचारःतस्यचेननधर्मत्वादिनिध्येय
सर्वंनिखिलंविश्वजातंत्वमसिसर्वस्यजंगमजातस्यआयुरसिअभिभूः ।। निखिलरूपातिरस्का
रहेतुः ।। ॐ भूर्भुवःस्वरितिपाद्यरूपाणिएतःसर्वात्मकपरमेश्वरप्रतिपादकत्वात् ।। गायत्र्याःसंभ
वतीतिभावः ।। एतादृशींगायत्रींमदीयमनस्यावाहयामिउपासितुमितिशेषः ।। एवंसावित्या
दिरूपेणगायत्र्याआवाहनं ।। अत्रैकस्याःसंध्यादेवतायाःकारुभेदेननाभेदोगीकारात् ।।

गायत्र्यादिभेदेन आवाहनमुक्तंतदुक्तंपारस्करमाधवीये ।। गायत्रीनामभूर्लोकेसावि
त्रीमध्यमेदिवे ।। सरस्वतीचसायाह्नेसापुंसंध्याविधामतेति ।। नामत्रयस्यनिर्वचनकृतंये
थांतरे ।। गायत्रीगीयतेतस्माद्गायंतंत्रायतेयतः ।। सवितुर्दोहनात्सैवसावित्रीपरिकीर्तिता ।।
जगतःप्रसवित्रीवावायूपत्वात्सरस्वती ।। छंदांसिगायत्र्यादीनिऋषीनूविश्वामित्रादीनूआवाह
यामि ।। अथयेनेतिश्रीरुक्ष्मीःनामावाहयामि ।। अथगायत्र्याश्छंदर्षिदेवतादिस्वरूपंदर्श
यति ।। गायत्र्याइति ।। गायत्रियागायत्रीछंदः ।। अर्थस्वंगायत्रीस्वरूपमाह प्राणा
पानेति ।। पंचप्राणात्मकेतिकृदंकार्थः ।। नागकूर्मकृकरदेवदत्तधनंजयाः ।। पंचोपप्राणाः
तद्युक्तःतस्याःकीदृशोवर्णइत्यपेक्षायामाह श्वेतवर्णेतिदृढमुपरुद्धंगायत्र्यादिभेदेन
रक्तवर्णकृष्णवर्णेनिदृष्टव्यं ।। तदुक्तंगायत्रीतुभवेद्रक्तासावित्रीशुक्लवर्णिका ।। सरस्वतीभ
वेत्कृष्णाउपास्यावर्णभेदतइति ।। साकीगोत्रेत्यतआह ।। सांख्यायनोनामकश्चिद्ऋषिः ।।

सांख्यायनेति

तेनचसमानंगोत्रंयस्याःसातथोक्तागायत्रीपदंव्याख्यातं॥ऋग्यजुःसामवेदरूपात्रयय
युक्तेत्यर्थः॥षट्कुक्षयोयस्याःसाषट्कुक्षिगादयः॥पंचशीर्षाव्याकरणंप्रथमंशिरःशिक्षा
द्वितीयंछंदस्तृतीयंनिरुक्तंचतुर्थंज्योतिषंपंचमं॥एतत्सर्वंगायत्रीहृदयेप्रतिपादितमिति
ध्येयं॥साकुत्रविनियुज्यतइत्यतआह॥उपनयनइतिउपनयनंनामअचार्यकर्तृकोमा
णवकनिष्ठःशौतःसंस्कारविशेषः॥तस्मिन्नियोगइत्यर्थः॥अत्रेदमाकूतं॥तथाविधसं
स्कारस्यगायत्युपदेशेसामर्थ्यात्॥सातत्रविनियुज्यते॥मंत्रार्थस्तुगायत्रीजपप्रसंगेसं
ग्रहेवक्ष्यते॥अत्रकेचित्तूपनयनशब्दंसंस्कारंकुः॥उपसमीपेनयनंउपनयनमिति॥
अपरेतुगर्भाष्टमेवर्षेवसंतेब्राह्मणआत्मानमुपनयनस्थंब्रूयादितिबौधायनवचनमुदा
हरंतःउपनेतारंप्रतिउपनेयस्यबटोरुपमानयस्थंतिप्रयोजनव्यापारउपनयनमितिउप
नयनपदंव्याचक्रुः॥अथगायत्रीजपःकर्तव्यःकथमितिचेत्॥तत्रशंखकुशरुद्राक्षमालां

स्या

नःकुशोत्तरायांकुशपवित्रपाणिःपश्चिमाभिमुखंसूर्याभिमुखंवाअक्षमालामादा
यतांध्यायन्गायत्रीजपंकुर्यादितिजपात्पूर्वमाचमनंकार्यंतदाहमनुः॥आचम्यप्रयतो
नित्यमुभेसंध्येसमाहितः॥शुचौदेशेजपंजाप्यमुपासीतयथाविधि॥तच्चाचमनंशौत
स्मार्तंवाकर्तव्यमितिसुकृमधस्तात्॥ओंखवचनेगायत्रीजपमित्यत्रप्रणवव्याहृतियुतां
गायत्रीजपेदितिगम्यते॥ओंकारपूर्वमुच्चार्यभूर्भुवस्तथैवच॥गायत्रीप्रणवश्चांतेजप
मेवमुदाहरेदिति॥अंतेप्रणवमितिपादकेयाज्ञवल्क्यवचनंतत्रवानप्रस्थयतिविषयंत
थाचोक्तंचंद्रिकायां॥गृहस्थोब्रह्मचारीचप्रणवाद्यामिमांजपेत्॥अंतेयःप्रणवंकुर्यान्ना
सोऽग्निमवाप्नुयात्॥तत्रैव॥संपुटितषडंगोंकारागायत्रीविविधामता॥तत्रैवप्रणवाकां
क्षायांगृहस्थेजपकर्मणीति॥तत्रत्रयाणांमध्येगायत्रीएकप्रणवाकार्या॥नतुप्रणवांतर
साहित्यंतात्पर्यंगृहस्थेदृष्टेरपिजपःकार्यःतदावसिष्ठः॥गृहस्थेवैनुजप्यात्तदेवब्र

व

सं॰भा॰ स्मचारिभिरिति॥ननुकथंभूतेन गायत्रीजपः कर्तव्यइतिचेदुच्यते॥सायमुपविश्यप
श्चिमोत्तरोजपमाचरेत्॥ प्रातःकालेतिष्ठन्प्राङ्मुखउदङ्मुखोवेति नियमः॥तदाहमनुः॥पूर्वांसं
ध्यांजपंस्तिष्ठन्नैशमेनोव्यपोहति॥पश्चिमांतुसमासीनःसम्यगृक्षविभावनात्॥
पूर्वांसंध्यांप्रातःसंध्यांपश्चिमांसायंसंध्यामित्यर्थः॥अत्रेदंतत्त्वंनिरूप्यते॥तत्रआ
कंरश्मीनादार्क्षंदर्शनादित्यभयत्रभाङ्वर्तनेतस्यअवध्यर्थैकत्वंवक्तव्यंआङ्मर्यादा
भिविध्योरितिपाणिनिस्मरणात्॥मर्यादावधिरितिसूत्रार्थः॥तथाचसूर्यनक्षत्रयो
र्दर्शनंगायत्रीजपस्यावधिर्भवति॥नतुरूढानोपवेशनयोःगायत्रीजपस्यैवमुख्यतया
वचनप्रतिपाद्यत्वात्॥तेनगौणकालेसंध्यानुष्ठानेजपस्यावश्यकत्वात्॥सायमुपवि ७२
श्येवप्रातस्तिष्ठन्जपेदितिगम्यतेत्यर्थांतरे॥ प्रातःकालेतथारूढःस्नाद्भौषुसमाहितः॥
प्राणायामत्रयंकृत्वाध्यायेत्संध्यांततःसुधीरिति॥संध्यांगायत्रीइदंवचनंप्रातर्गो

यत्रीजपपरंनविदमनुपपन्नं॥तिष्ठन्प्रातर्जपेदित्यंब्रह्मचारीसमाहितइतिवचनाद्ध
ोरेवतिष्ठतःप्रातर्गायत्रीजपोविहितःनतुगृहस्थस्येतिचेदुच्यते॥तत्रब्रह्मचारिप
दं॥नबटुमात्रपरं॥तदुक्तंश्रीपादैःब्रह्मभावेमनश्चारंब्रह्मचर्यंप्रचक्षतेइति॥तेनस
र्वोपिब्रह्मध्यायनूतिष्ठन्नेवप्रातर्जपंकुर्यात्॥वृषाकपिरपि॥कन्यादानंचगोदानंउत्त
रायणमेवच॥प्रातःसंध्याजपंचैवतिष्ठन्नेवनसंशयः॥संध्यायुत्री॥नन्विदमनुपपन्नं॥
संध्ययोश्चबहिर्ग्रामादासनंवाग्यतश्चेतिसूत्रकारेणउपवेशनस्यैवस्वीकारादितिचेन्न
तत्रासनपदस्यरूढानोपलक्षणकत्वांगीकारात्॥अतएवहारितःअन्येतुप्रआसन
ग्रहणंरूढानोपलक्षणार्थं॥वाग्यतश्चेतिलौकिकवाचोनिवृत्यर्थमितिवर्णयंति॥नचां
न्यपदप्रयोगात्प्रकथंस्वसिद्धांतइतिवाच्यं॥प्रातस्तिष्ठंश्चैवगायत्रीजपःकर्तव्यइतिनि
र्णयवतांमन्वादिस्मृतिकारणांआश्वलायनस्मृतिकारणांचमतमालोक्यइतिरूढा

सनशब्दस्य मुख्यकल्पपरित्यागीकारात्॥आश्वलायनशाखिभिरपि॥प्रातस्निष्ठतासा
यमुपवेशनातावज्जपः कार्यः॥तदाहभगवानाश्वलायनः वाग्यतः सायमासीनः उत्तरापर
मुखोस्याष्टउपविशन्सावित्रीजपेत्॥अर्धास्तमितेमंडलेचानक्षत्रदर्शनादेवं प्रातः प्राङ्मु
खस्तिष्ठन्नुदगिमंस्येउडुदर्शनादितिउत्तरापरमुखोवायव्याभिमुखइतिहरिकारः॥अत्रका
लस्तैः॥कुशासनेसमासीनोगायत्रीजपमाचरेत्॥आतारकोदयात्सार्यमर्धास्तमित
भास्करे॥अर्धास्तमितेसतिअर्घ्यदानानंतरंकुशासनेसमुपविश्यवायव्यास्याष्टभागो
भागःउत्तरापरः॥तदभिमुखोजपेदित्यर्थः॥तदुक्तंविश्वामित्रसंहितायां॥वायव्याष्टे
मोभागउत्तरोयःस्मृतासनः॥समाहितोजपेद्वीकुशपाणिरतंद्रितइति॥एतेनस्तूयम ६३
पिव्याख्यातं॥यद्यपिगृह्यकारमतेआतारकोदयादितितारकोदयकालस्यैवजपावधि
त्वंप्रतीयतेननुदशादिकसंख्यायाःतथापिसंख्याअवश्यकी॥आसंख्यानंतुयज

तःसर्वेस्यान्निरर्थकमितिसंख्याहीनस्यैववैफल्यश्रवणात्॥एतेनसंख्यार्थकीइ
त्यवगम्यते॥संकल्पस्तु॥यत्तुगृहस्थोब्रह्मचारीचयतमघोत्तरंजपेत्॥वानप्रस्थोयति
श्चैवसहस्रादधिकंजपेत्॥तत्तुगौणकालत्वविषयमितिनकश्चिद्दोषः॥अत्रेदंविचार्यते॥
जपकालेगायत्रीसकृदविच्छिन्नपादाजप्तव्या॥नतुविच्छिन्नापादा॥तदाहशौनकः॥य
न थानिशांतंगायत्रीमुच्चरेज्जपमाचरेत्॥संध्यामुच्छिन्नपादांचेज्जपोभवतिनिष्फलइति॥
यथानिशांतंयथाध्ययनमितिचंद्रिकायां॥नतुविच्छिन्नपादागायत्रीब्रह्महत्यांव्यप
अ तिच्छिन्नपादावुगायत्रीब्रह्महत्यांव्यपोहति॥इतिवचनाच्छिन्नपादेवजप्तव्येतिचेन्नइदं
वचनंगायत्रीकल्पाद्यागमशास्त्रानुरोधेनदृष्टादृष्टफलसिद्धयेप्रयोगंकुर्वतांगायत्रीमं
त्रोपासकानांछिन्नपादागायत्रीस्मृतिबोधयतिननुवेदोक्तमार्गेणतथैवजपंतीतथेति॥न प
नुउपनयनकालेपठ्यार्धर्चब्राह्मणतःसर्वोमिनिगायत्रीमंत्रस्यउपदिष्टस्तत्रथैवजपःकिंन

स्यादितिचेन्न॥वयोगृहणासमर्थत्वेनतथोपदेशः कियतइति॥इदानीमपिकिंतथ
रूपंअतएवसुदर्शनचार्यैरुक्तं॥कुमारायगृहाणार्थंतत्सवितुर्वरेण्यमित्येतामृचमन्याद्
ति॥अन्यथाव्याहृतिविहृताः पादादिघटकेषुवातथार्थत्वयोः॥उत्तमोक्तस्नाद्धियाम
स्यादिकमनित्यकालविहितंप्रसक्तंस्यात्॥अविशेषात्॥तस्माद्गृहाणार्थमेवउपनय
नकालेतथोक्तं॥नतुनियमार्थं॥अन्यथातत: सर्वोमित्यनुपपन्नंस्यात्॥तस्मादृष्टेन वि
जपप्रक्रिया पादाजस्रमेतिसिध्यैपूर्वंजपः कर्तव्यइत्युक्तं॥तदभावेपिनक्षतिःतस्यपर्वभिरपिकर्तु
शक्यत्वात्॥अतस्तर्हेतुकंसएवाह॥पर्वभिस्तुजपेद्देवीमन्यत्रानियमः स्मृतः॥गायत्री
वेदबीजत्वाद्देवःपर्वसुगीयतइति॥आरभ्यानामिकायास्तुमध्यमेपर्वणिक्रमात्॥त
र्जनीमूलपर्यंतंजपेद्गृहस्थपर्वसु॥मध्यमांगुलिमूलेतुयत्सर्वद्वितयंभवेत्॥तद्वैमेरुवि
ज्ञानीयाज्जपेत्तन्नाभिलंघयेत्॥मध्यमपर्वानतिक्रम्यैवकरादेवपुनरनामिकामध्य

पर्वमारभ्यजपः कर्तव्यइत्यर्थः॥पर्वभिरेवजपः ब्रह्मकार्योनांगुल्यादिभिः तदुक्त्यासेन॥
पर्वभिस्तुजपः कार्योनांगुलीनांनिपातनैः॥निपातनेनुयज्जप्तंतत्सर्वंराक्षसंभवेन्नृप॥
अत्रायंविवेकः॥संध्यावंदनगायत्रीजपस्तुकरमाल्ययेति॥आपस्तंबानामयंमयोगः॥
आचम्यप्राणानायम्योपासदुरितक्षयद्वारापरमेश्वरप्रीत्यर्थंशतवारमितवारंवा
जपंकरिष्यइतिसंकल्पंजपेत्॥तदुक्तमापस्तंबेन॥दर्भेष्वासीनोदर्भान्धारयमाणःसो
दकेनपाणिनाप्रत्यङ्मुखःसावित्रींसहस्रकृत्व आवर्तयेत्॥शतकृत्वोपरिमितकृत्वोवे
ति॥आश्वलायनानांनेवमितिप्रागेवोक्तं॥जपलक्षणमुक्तंग्रंथांतरे॥प्रातर्नोमासमं
न कुर्यान्मध्याह्नेहृदयंजपेत्॥सायंनाभिसमंकुर्याद्गायत्रीजपलक्षणमिति॥नचजपा
दौसंकल्पकरणंमानाभावइतिशंकनीयं॥श्रुतिस्मृत्यादिविहितंब्रह्मकार्यइतियतथा॥
यतासुरागुणभावेनथाकृत्याजलंस्मृतं॥इतिवचनस्यैवमानत्वात्॥संकल्पाभावेक

मेवैकल्पेस्मर्यते ॥ नतच्छ्राद्धेनतद्दोषोनरानेनचवैजपः ॥ नपाप्नोतिफलंतस्यसंकल्परहि
तंयदेति ॥ प्रदोषादिकालेजपनियममाहचंद्रिकाकारः ॥ श्राद्धेप्रदोषदर्शेचगायत्रीदशसंख्य
या ॥ अथाविंशत्यनध्यायेषुयोदश्यांतुमानसे ॥ श्राद्धेश्राद्धभोजनानंतरंनतुदशसंख्या
द्यधिकारएवनास्ति ॥ श्राद्धभोजनस्यकर्माधिकारपारंपर्यत्वात्इतिचेन्न ॥ दशवारंगा
यत्र्यभिमंत्रितजलेपीत्वाकर्माधिकारीभवति ॥ तदुक्तंकामकारेदशकृत्वःपिबेदापोगायत्र्या
श्राद्धभुद्विजः ॥ ततःसंध्यामुपासीतजपेच्चनुकृयादपि ॥ इदंचसायंसंध्याविषयमितिध्ये
यं ॥ यत्तुजपारोन्यासमुद्रिकांकुर्वंतितत्तूपासनांगंनवैदिकसंध्यांगंगृह्यमन्त्रादिषुचाव्य
सिद्धेः ॥ हृदयादिषडंगन्यासादिकंमाचारानुसारेणकर्तव्यं ॥ अथगायत्रीमंत्रोव्याख्यायते ॥ ५५
व्या ओमित्येकाक्षरंब्रह्मेत्यादिश्रुतेश्चव्याहृतीःभूर्भुवःस्वरित्येकपदोधिकागायत्रीव्याख्यायते ॥
तदितिसाचत्रिपदात्रिपदागायत्रीतिश्रुतेः ॥ चतुर्थपादःकिमितिनपठ्यतेइतिचेन् ॥

अधिकाराभावात्तथाहि ॥ उपनयनेनामश्रुतिविहितसंस्कारः साचश्रुतिः ॥ त्रिपदा
गायत्रीनचतुष्पदी ॥ तथाचयावन्नामंत्रेणोपनयनंविहितंतस्यैवोपनीतस्याधिकारः ॥
नान्यश्चतुर्थपादस्याथर्वणांतःपातिनस्तत्रपृथगुपनयनस्यावश्यकत्वात् ॥ तदभावेन
अथर्वणांतःपातिनिचतुर्थपादेनाधिकारःतदुक्तमुन्मत्तगंगायांअथर्वणवेदस्यपुनरुपनय
नंकर्तव्यंतथाचब्राह्मणंनान्यत्रसंस्कृतोभृग्वंगिरसोधीयीतेति ॥ तस्माच्चतुर्थपादोनास्ती
तिसिद्धं ॥ मंत्रार्थस्तु ॥ दीव्यतिउदयास्तमानाभ्यांलोकत्रयंत्रोभवतेयनूदगयनांतरंयातीति
देवःदिवुक्रीडायांपचाद्यच् ॥ दिव्यतिप्रकाशयतीतिवादेवःद्युलोकवर्तित्वाद्वादेवःध्यातृ
हृदयारविंदमध्येक्रीडतीतिवादेवः ॥ देवोद्युलोकवर्तित्वाद्देवनाद्देवनेनचेतिवचनात् ॥
तस्यदेवस्यसवितुर्निषद्याप्राप्तिरूपस्यांतस्यैत्यर्थः ॥ सुपांसुलुगितिसप्तम्याः ॥ सवितुस्सकल
जगन्निर्मातुर्निखिलैश्वर्यसंपन्नस्यतत्सवितुर्वरेण्यं ॥ याभिर्गद्दिस्वस्वापतिरक्षाभिरुता

भिःपर्जन्योवर्षतइतिश्रुतेः।।अग्नीषोमात्मकुनिःसम्यगादित्यमुपनिष्ठते।।आदित्याज्जाय
तेवृष्टेरन्नंततःप्रजाइतिस्मृतेश्चयद्वासूतेसकलंचराचरंयोसिध्यान्नृणामितिसवितोद्यं
तमस्तत्त्वंचतमादित्यमभिध्यायन्कुर्वन्ब्राह्मणोविद्वान्सकलंभद्रमश्नुतेइतिश्रुतेः।।
एवंविधस्यआदित्यस्यसंबंधिवरेण्यंपुरुषार्थकामिभिर्वरणीयंभर्गः।।नन्वादौनोचकल्प
तेयज्जीजिवित्यनेनयजतेर्वरेण्यमित्यत्रवर्णश्चतुष्टयंपरिहृतंयत्तूच्चारणमितिदृ
ष्यात्।।भजतितमस्कांडेहृतीतिभर्गेतेजःअभ्यजियुजिभृजांचेयोगादिकसूत्रेतथादर्श
नात्।।अतएवात्रप्रणीतश्लोकोस्ति।।भगवत्सूर्यात्मकहरिमहीसावाचकंतत्।।धीमहि
ध्यायेमहीभार्थेनायांलिङ्ध्यतेःसंप्रसारणंछांदसंध्यायेमहीतिशब्दोकोधीमहीत्ये ५६
तदुच्यतेइतिपूर्वेत्यादृणांवचनात्।।एतच्छब्दादिसहिताःसोरंतेजःध्योमहीतिपिंडिता ये
र्थः।।अतोनवदुवाचनानुपपत्तिः।।ध्यानधारणनैरंतर्यविवक्षयावावदुवचनोपपत्तिर

तिद्रष्टव्यंतत्किमर्थमतआह।।धियोयोनियःसवितासधियः।।द्वितीयार्थेषाठछांदसः।।
प्रचोदयात्प्रकर्षेणप्रेरयतियःसकलकर्मानुष्ठानप्रवणाद्वकर्मविमुखाबुधिःकरोति।।
तस्यसवितुःतेजोध्यायेमहीइतिसंबंधः।।प्रचोदयादितिलिङ्प्रयोगश्छांदसः।।उतैनंगो
पाअदृश्रन्नदृश्रन्नुदहार्यंइतिश्रुत्याआदित्यस्यापिशिवपरत्वमुक्तं।।वस्तुतस्तुगायत्री
मंत्रः।साक्षात्शिवपरएवतथाहिसवितुर्देवस्यतत्स्वरूपंदेवस्येत्यर्थः।।राहोःशिरइतिव
त्।औपचारिकीषष्ठी।।मंडलांतर्गतइतिशेषः।।मंडलांतर्गतंहिरण्मयंभ्राजमानवपु
षंशुचिस्मितंचउदधिमितमंडलंविग्रहंचिंतयन्मुनिःसहस्रसवितॄमितिश्रुतेः।।वरेण्यंश्रे
ष्ठंशिवंस्यन्नसंदेवस्यत्वात्।।तदितिद्वितीयांतंपरिणम्यते।।सुगामितिसूत्रेणअमूविभू
क्तेर्लोपेनेर्थामहिध्यायेमहीं।।सदाशिवध्यानस्यैवकध्यानेऽन्यापेक्षस्यैकेनकर्तु
मशक्यत्वात्।।तदनुसंधानकुशलैःपुरुषपुंडरीकैःसहकर्तुंशक्यत्वान्नबहुत्वोक्तिरिति

ध्येयंतत्किमर्थमित्यतआह॥धियइति॥भर्गःशिवःपूर्वपादस्थितस्यापिभर्गशब्दस्य
अत्रान्वयबलात्॥अनुपपन्नंकार्यमितिविवेकः॥अस्मान्धियःस्नानादिश्रौतकर्मनिर
कृतक्षणयाअज्ञानपूरःधीः॥एकांतशब्दवत्॥प्रचोदयात्॥प्रकर्षेणज्ञानपारंगमयेदि
तिप्रार्थनाक्रियते॥अस्मिन्नर्थेश्रुतिः॥उमासहायंपरमेश्वरंप्रभुंत्रिलोचनंनीलकंठम
शांतंध्यात्वामुनिर्गच्छतिभूतयोनिंसमस्तसाक्षिंतमसःपरस्तात्॥इतितमसः॥अ
ज्ञानस्यपरत्वात्पारंदूरत्वर्थः॥सर्ववेदांतसारंयमवरेण्यमकाश्यतेंगयत्रीनिगमार्थोयं
सदाचार्यप्रसादतः॥तदितिनंदतीतिदेवः॥अखंडानंदरसइत्यर्थः॥तदितिषष्ठ्यापरिण
म्यते॥तस्यदेवस्यसूतेनानोपासनाफलमितिसविता॥विद्येशितस्यापितत्तदाकारेण ६७
तत्॥तत्फलजनकत्वाभ्युपगमात्॥यद्वासूतेजगतीतिसवितासकलजगदुपादान
कारणमित्यर्थः॥सवितामसवानामधीशः॥सवितामसवानामधिपतिरितिवाक्याभ्यो

सवितृशब्दस्योत्पत्त्यर्थकत्वात्॥इदंचजगत्सकलमितृत्वजगत्संहर्तृत्वयोरुपल
क्षणं॥तथाच॥जगदुत्पत्तिस्थितिलयकारणंलभ्यते॥तदितिब्रह्मवाचिषष्ठ्यंतंसूया
मितिधातुनिस्मरणात्॥ॐतत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतइतिवचनात्॥
तच्छब्दस्यब्रह्मवाचकत्वात्॥वरेण्यंपुरुषार्थकामिभिरर्थ्यमानंश्रेष्ठंच॥भर्गःअवि्या
दोषभर्जनंतेजःवीर्यंवेभर्गःइतिश्रुतेः॥भर्गइतितेजइतिदृश्यैः॥पूर्वंव्याख्यातत्वाच्च॥
अत्रभर्गोनाभर्गेंद्रजिनादित्याकुंब्रह्मणस्तेजोरूपत्वेपिएषोस्यपरमानंदइतिवत्॥
औपचारिकइतिभेदव्यपदेशोद्रष्टव्यः॥तथाच॥अद्वयानंदलक्षणंजगदुपादानंपरि
पूर्णज्योतिरूपंसावज्ञानीयंब्रह्मवाक्यार्थइतिसंपन्नं॥एतादृग्ब्रह्मतद्रूपत्वेनेतिशे
षः॥धीमहिध्यायेमहि॥धियःअस्माकमंतःकरणवृत्तीरित्यर्थः॥प्रचोदयात्॥
प्रेरयतिमनःकरणवृत्त्यादिकंमाकाशयतीतियावत्॥तथाच॥अंतःकरणयत

दूर्मावभासकत्वेनसाक्षित्वेनदूर्वोंकंब्रह्मध्यायेमहि॥इतिर्गलितार्थः॥वस्तुतस्तूर्वो
कंब्रह्मधीमहि॥सोहमिति॥प्रत्यक्लक्षणयाध्यायेमहि॥ननुब्रह्मप्रत्यक्लक्षणंद्वयंनहि
लक्षणमेवकर्तृत्वाद्यनाश्रयत्वादित्याशंक्यतत्प्रत्यक्लक्षणंत्वमेवासिद्दमित्याह॥धि
यद्यनियःयद्वाब्रह्मपुंस्त्वस्त्रीनिर्देशाच्छांदसः॥यछब्दश्चयादित्यर्थेलिंगव्यत्ययोभवेत्तद्
ति॥नीलकंठवचनात्॥जीवात्मनाप्रविश्याधियःअंतःकरणवृत्तीःप्रचोदयात्प्रेरयति॥
तथाचबिंबस्थानीयंब्रह्मैवसाक्षिरूपमितितल्लक्षणाध्यानमुपपन्नमितिनकश्चिदो
षः॥तस्मात्प्रत्यग्ब्रह्मैक्यमेवपर्यवस्यतीतिब्रह्मैवगायत्रीमंत्रार्थः॥अत्रगा
यत्रीमंत्रार्थःश्लोकरूपेणविद्यारण्यस्वामिभिःसमुदाहृतःसचात्रोद्दाह्रियते॥तादित्यवाञ्म ४९
नोगम्यध्येयंयत्सूर्यमंडले॥सवितुःसकलोत्पत्तिस्थितिसंहारकारिणः॥वरेण्यमाभय
णीयंयदाधारमिदंजगत्॥भर्गःस्वसाक्षात्कारेणवारिणीःदूरीकृत्यलिंगधर्मेयस्तत्तानात्म ५०
वियातत्कार्यलक्षणं॥देवस्यद्योतमानस्यस्वानंदात्कीर्तनादपि॥धीमह्यहंसंगमेनतेनेयाभेदसिद्धये॥
धियोयोनःकरणवृत्तीःप्रत्यक्प्रवण

व

दित्यक्षणं॥सोस्माकंब्रह्मकुर्यात्तमिमंभेदशांतये॥प्रचोदयात्प्रेरयतिप्रार्थनेयंविधिष्य
ते॥अत्रश्लोकोपकारंजपलक्षणंनिरूप्यते॥तथाप्रध्यानसंध्यायामासीनःप्राङ्मुखोजपेत्॥
निष्टन्वापिजपेद्देवीमादित्याभिमुखोद्विजः॥कृत्वानीकरोमानःसायंचाधोमुखीकरोत्॥मं
द्रमसारिनकरोमध्याह्नेसमुदाहृतौ॥जपादौकरशुद्धिःकार्यातत्रलक्षंतु॥प्रकोष्टमणिबंधे
तुपार्श्वयोस्तत्रयोरपि॥तत्रष्टचतदग्रेचकरशुद्धिरुदाहृता॥अथोपस्थानमंत्राख्या
ख्यायंते॥तत्रापरार्धीयानांसायमिममेवरुणेतिउपस्थानमंत्राः॥मध्याह्नेआसत्ये
नेति॥प्रातस्त्रमित्रस्यचर्षणीधृतइति॥अत्रवृत्रवधेसिद्धः॥प्राणायामैस्त्रिभिःपूतोगाय
त्रीजपमाचरेत्॥अथोपनिषदादित्यमुपस्थायसुसमाहितः॥चंद्रिकायांजपंकृत्वाविधाने
नसंध्योपस्थानमाचरेत्॥उपस्थानंचकर्मैतदादित्यस्यनुकारयेत्॥स्वकेःस्थानेचापिनेः॥
तस्मिंगेमेनेत्यर्थः॥सायंकालेयाऋणीभिरादित्यमुपस्थायप्रदक्षिणंकुर्वन्दिशोनमस्कुर्यात्॥

सं० भा० दिगीशांश्चस्थकस्थकस्थगिति आश्वलायनानामयंविभागः॥ * मातर्मित्रीभिः सा
यंवारुणीभिरादित्यमुपतिष्ठेतेति॥ तदुक्तमाश्वलायनस्मृतौ॥ अथोपतिष्ठेदादित्यमु
६२ दयंसुसमाहितः॥ मैत्रीभिर्वारुणेनासंगतंसूक्तेनबह्वृचस्य॥ यद्यपिगृह्येनोक्तं॥ तथा
२ पिस्मृतौतेनैवोक्तत्वात्कर्तव्यं॥ गृह्येउपस्थानानुक्तिर्लौकिकमूलोत्पन्नशाखायाअभावात्॥
गृह्यस्योत्पन्नशाखामूलत्वंआपस्तंबीयेदृश्यते॥ तेषामुत्सर्गः प्रायोगादनुमी
यतेइति॥ सएवाश्वलायनः कथंस्मृतौनिबंधइतिचेन्न॥ अनुमेयमेवानुमूलस्मृतिषुउप
स्थानस्योक्तत्वात्॥ आश्वलायनस्मृतौनिबंधनंकृतमितिनकश्चिद्दोषः॥ स्मृतेरयमर्थः॥
मातर्मित्रीभिर्मैत्रीभिः॥ मित्रस्यचर्षणीधृतइत्यादित्यमुपतिष्ठेतवारुणेनयच्छिष्टं ६२
इति तिपंचर्चेनसूक्तेनसायमित्यर्थः॥ सूक्तेमित्रस्यचर्षणीधृतंचसोमेत्यृग्॥ यच्छिष्टेतिपंच ८
र्चेवारुणमिति॥ ज्ञापंतेमातः सोमेत्रैः सूर्यमुपतिष्ठते॥ सायंवारुणेनयद्वाउभयत्रज्ञात

वेदसदृनिउभयत्रआश्वलायनानामुपस्थानमंत्रः॥ पूर्वोक्ताश्वलायनस्मृतिविरोधेन
आश्वलायनानामभिमतत्वात्॥ याज्ञाश्वलायनाचारविरोधात्॥ केवलाश्वलायनास्तुका
लद्वयेपिजातवेदसदृनिउपस्थानमाचरंति॥ तथाचारविरुद्धमित्युपेक्षणीयं॥ इममदृनि॥
पुराकश्चिच्छुनःशेपऋषिः॥ पशुत्वेनयूपेबध्वः॥ सन्बंधविमोचनार्थंवरुणंप्रार्थयामास॥
तत्प्रार्थनाप्रकारेणेनंमंत्रेणस्तौति॥ तथाहि॥ हेवरुण॥ इममेमदीयंहवंआह्वानंशृधि
शृणु॥ बृहद्भ्यश्चंदसिहवार्धिः॥ अन्येषामपिदृश्यतइतिदीर्घः प्रार्थनामाहममाह्वानंश्रु
त्वेतिभावः॥ किंतेनश्रवणेनेत्याकांक्षयामाह॥ अधदृदानींदीर्घश्छंदसः मृडयबंध
नंपरिहृत्यमांसुखिनंकुर्वित्यर्थः॥ नन्वावयोः कःसंबंधइत्यतआह॥ त्वामित्त्वांभवं
न तेअवस्युः अवोरक्षणंमात्मनइच्छन्भाचकेरक्षितारंकामयेनकेवलंकामनामात्रंकिंतुस्तुतिपु
रःसरंशरणागतोस्मीत्याह॥ नहित्वतन्मेविभरक्लेपच्छंदसःशरणायेत्यर्थः॥ ब्रह्म

णाल्कत्वात्मनामंत्रेणवंदमानः नमस्कारंकुर्वेनूतनायामिषपद्यंयतस्त्वंभक्तजनपरिपा
लकोसि अतोहंत्वामेवरक्षितारंभजनन्नरणंगतोस्मि॥तेनमांमृडयंतदानारुतेतस्मात्अव
र्यंसुखयेत्यर्थः॥विनयपूर्वकंस्वकृतंभवतेवरुणायसमर्पयते॥अहेडमानइति॥हेवरुण
त्वंअहेडमानःअनादरमकुर्वन्अकुध्यन्वाऽहअस्मिन्लोकेबोधिममयाचनंबुध्यस्वमद्द
त्तंयाचनमनुगृह्णीत्यर्थः॥कथितमाहउरुणइति॥उरुभिर्मंत्रैःस्तोतव्यःतस्यसंबोधनंहेउ
रुणइतिउरुकीर्तिमान्वानःअस्मान्वानःअस्माकंयजमानाद्यपेक्षयाबहुवचनं॥अन्यथा
इमंमेवरुणइत्यत्रएकवचनप्रयोगाच्चनन्वसंगतिरितिमंतव्यं आयुःजीवितंमाप्रमोषीःमात्र
णाग्रयअस्माकंवेदोक्तमायुष्यंदेहीत्यर्थः॥यदितिचिदित्यस्यव्याख्यायंपादपूरणार्थे॥हेवरुण
तेतवउपमनात्मकंवनंयत्॥द्यविद्यविदिवसेदिवसेप्रकर्षेणमिनीमसितर्कयामःतवद्वे
षांतः॥विश्वोयथासर्वाप्रजाःस्वस्वव्यापारंतर्कयंतेतद्वत्॥हीयस्मात्वदीयमेवकर्मसर्वे

थांतर्कयामः॥तस्मात्त्वामेवपरिचरामोतिवाक्यशेषः॥यद्यामिनीमसिप्रकर्षेणकुर्मेःत
द्वदंतः॥विश्वोयथेतिविश्वोमनुथाः॥अज्ञानिनःयद्वत्तद्वदित्यर्थः॥मदीयव्रतनिमि
त्तापराधंक्षमस्वेतिवाक्यशेषेयंकिंचेतिहेवरुणदेव्येदेवलोकेवर्तिनिजनेत्वयीत्यर्थः॥
यत्किंचित्अभिद्रोहंस्वस्यमधिकंवाद्रोहंअचित्त्याअज्ञानेनचरामसिकुर्मः किंचतव
यद्यपिधर्मोधर्मेतिदीर्घश्छांदसेदः॥तदीयैकर्मयुयोपिममाविनाश्यायामः॥हेदेवतस्मा
त्एनसःद्रोहात्नःअस्मान्मारीरिषःमाहींसीः कर्मलोपनिमित्तंएनःपरिहृत्यअस्मा
न्परिपालयेत्यर्थः॥कितवासः धूर्तसमानाःभाग्यसेरसुगीरिसुगागमःस्वार्थसाध
नपराःकश्चिज्जःएतत्कर्मांगंशरीरंपुत्रेनासितवंतःसमर्प्यवहत्यनभावनेत्यर्थः॥यद्वाउ
तद्वत्यस्यदृष्टांतरवाचमेतिपादपूरणोपपदवाचकोनिपातःअथवायत्पापंनित्यंभव्या
कृतंअज्ञानेकृतमित्यर्थः॥यदीमित्यन्वयःउतअपिचयद्वमंत्रस्वरूपेनविद्मनजानीमहे॥

DR BHAU DAJI LIBRARY

यद्वरुणोऽश्रमधर्मेस्यतत्त्वेनजानीमइत्यर्थः॥अकृततः किंतमाहसर्वेतिसर्वाःसर्वाणि
कृत्सिगिराचरितानाकृतंअतात्वाकृतंचेतिद्वयेवमस्माभिःबहुधाएनांसिकृतानिसं
१।१ तितानिसर्वाण्येनांसिविद्यअस्मत्सकाशादिदंघेणापनीतानिकुरुविनाशयेत्यर्थः॥ए
नंअधिकपातकनिरासमाकांक्षन्लघुपातकनिरासमकांक्षतेशिथिरेवेतिशिथिलानि
छांदसमेवअन्यानिक्षुद्रपातकानियानितानिसर्वाणिविद्येत्यर्थः॥अथहैवरुणंतेव
प्रियासःप्रियाःस्यामभवेमअवेदंप्रतिभातिअयमर्थः॥सूर्योपस्थानेविनियुक्तःननुमंत्र
लिंगाद्वरुणोपस्थानेमंत्रस्यविनियोगः॥प्रतीयतेइतिचेत्सत्यंतथापिवरुणोमित्रादित्यमुप
स्थायप्रदक्षिणमितिद्वितीयाश्रुत्यालिंगापेक्षयाबलवत्त्वात्॥तद्विगाद्वाआदित्योपस्था
नएवमंत्राविनियुज्यंते॥नवरुणोपस्थानेएतत्सर्वंतृतीयाध्यायेविचारितं॥ऐंद्र्यागार्हप ५।१
त्यमुपनिषत्सत्यंपरशोरमाथवीयेपिपठंतिवरुणोपस्थानेप्राणंइत्यादिनामविशे

षेनिरूपितं॥प्रातरुपस्थानमंत्रमाह॥मित्रस्येतिअहरभिमानिनीआदित्यमित्रःचर्ष
ण्यःप्रजाःकर्षतादेवश्चकेत्यौणादिकसूत्रेणनिपत्ययः अदेश्चाकारश्चधातोश्चर्षणीधृतः
स्यदेवस्यभूयनयद्वितिभवःयज्ञःसानसिसम्यग्भजनीयंसत्यंअविनाशिचित्रंआश्चर्यं
यथातथाअतिशयेनभूयनद्वितिचित्रभवस्तमंश्रोतृजनमःसुखरंकेमित्यर्थः॥एवंभूतं
मित्रस्यभवःस्तोमीतिशेषः॥अथवामनुष्याणांधारयितुः॥मित्रस्यदेवस्यमित्रनामक
भवः देवस्येत्यर्थः॥श्रोतुंयोग्यंश्रोत्यंमहत्स्तोमीतिशेषः॥सानसिफलदानंशीलंसत्यंसत्यशी
लंचित्रंविचित्रंभवःकीर्तिःयस्यासौचित्रभवस्तमंअतिशयेनाद्भुतचित्रभवस्तमंय
जामहइतिशेषः॥मित्रमेवपुनःस्तोमीतिअयंमित्रःप्रजाननस्तदधिकारानविशांसःसर्वान्
जनानयानमानिस्वस्वकर्मणियोजयति॥किंचमित्रःपृथिवीधारउतअपिचमित्रःकृष्टीः
मनुष्यान्॥अनिमिषःभवथःमनुअनिमिषःअनिमिषान्देवानित्यर्थः॥विभक्तिर्लोपश्छांदसः

अभिचष्टेसर्वतःपश्यतिसर्वत्रप्रकाशयतीत्यर्थः॥ सत्यायस्त्यफलायसर्वात्मनेवान
स्मैमित्रायहव्यंचरुलक्षणंघृतवद्घृतयुक्तंविधेमकुर्मः॥हेआदित्यवतेनयजमानःतव
संबंधिनाव्रतेनकर्मणाश्रिष्टतिअनुष्ठातुंप्रारब्धोभवतुमिछतिहेमित्रसमर्त्यःमनुष्यःय
जमानःप्रकर्षेणप्रयस्त्यानुकर्मफलयुक्तोस्तुतोत्तःत्वयाउतसयजमानःनहिन्यतेरोगा
दिनापीड्यतेनजीयतेवैरिभिर्नाभिभूयते॥अपिचत्वयारक्षितःएनंयजमानंहेअं
पापाअंहितःसमीपात्नाभोनभागोनिमदनुग्रहाद्भिनंपुरुषंकृधोपदवाःनस्मृद्धी
तीभावः॥अथसंध्यावंयंपिपाठ्यादिदिग्बंधनंतदधिदैवतेंद्रादिवंदनंचकर्तव्यंतदुक्तं॥
कुर्वेदिशोनमस्कुर्यादिशांशांश्चपृथक्पृथगितित्वमेवस्तु॥नमःप्राच्यैदिशाइत्यादित
इदंकश्यपेंद्रादयःप्रतिवसंतिनिहंतिताभ्यश्चनमोनमः॥अरुक्॥एवंसर्वयोजना
यंकामःकामाभिमानिनीदेवः॥अकामीनू॥सएवकरोतिनाहंकरोमीतिभावकामःकर्ता

नाहंकर्तेतिश्रुतेःकुर्वेन्नपिनलिप्यतइतिस्मृतेश्चमन्युःतदभिमानिनीदेवःअन्यद्वर्तत
स्मैकामायमन्यवेनमोस्त्वित्यर्थः॥याद्यद्यिवीयाआपःयतेजःयोवायुःयदाकाशंपंचमीपा
ञ्चछंदसःतेभ्यःपंचभूतेभ्योनमोस्त्वित्यन्वयः॥अथवासुदेवायनमःसमर्पयामि॥ॐ
नमइत्योंकारवाच्यायभगवतेऐश्वर्यसंपन्नायेत्यर्थः॥ऐश्वर्यस्यसमग्रस्यवीर्यस्य
यशसःश्रीयः॥ज्ञानवैराग्ययोश्चैवषण्णांभगइतीरितः॥वसुदेवस्यापत्यंपुमान्वासुदेवः॥
यद्वासर्वस्मिंभूतानिवसंतिवासुश्चासौदेवश्चेतिविग्रहः॥अथसंध्यारूपांपरदेवतांप्रा
र्थयतेयामितिसर्वाणिभूतानियांसंध्यांनमस्यंतिसासंध्यामांअभिरक्षत्वित्यर्थः॥अनेद
न्त्वमंत्रविचार्यते॥स्मार्यंप्रातरितिविशेषोपादानात्॥संध्येउभेएवैतिस्मः अतएवापस्ते
वस्त्वेसंध्याश्वत्रहियोभादासनेवाग्यतइति॥अत्राहिवचनमुपातंआश्वलायनसूत्रेपिय
ज्ञोपवीतीनित्यादकःसंध्यामुपासीतेत्यत्रभानः माध्युखउपविश्येत्यंतेनउभयोरेवोपादा

नंसंध्यार्थोः कृतंमाध्याह्निकीतुस्मृतिवचनादागतानतुगृह्यकारवचनान्॥अत्रेदमपिज्ञा
पकंयथर्मज्ञाःप्रमादादिनाकदाचिन्माध्याह्निकींसंध्यामकृत्वैवभोजनंकृतंनदोषःस्यादिति
तन्निवार्यतारभ्यउत्तमंशिखरइत्यंतंपुराणश्लोकस्यार्थः॥उत्तमेशिखरइतिनस्यायमर्थः॥
भूम्यामवस्थितोयःपर्वतोमेरुनामकःतस्यमूर्ध्निउपरिभागेजातेविद्यमानेउत्तमेशब्देशिख
रेउत्कृष्टशिखराकारमंदिरइत्यर्थः॥ब्रूतमितिशेषः ब्राह्मणेभ्यःनिरंतरमुपासकेभ्यःद्विजे
भ्योनुज्ञाताहेदेवीगच्छयथासुखंअस्मानुपासकानूअनुगृह्णन्त्वायथासुखंपथागतंगच्छत्य
र्थः॥शिष्टंस्पष्टं॥अथचरक्षणार्थंद्यावापृथिव्योःस्तौति॥इदमितिहेपितःद्युलोकहेमातःपृ
थिवीदंवैमाताअसौपिताद्योःपिताःपृथिवीमातेतिश्रुतिः॥वांयुवांप्रतिरक्षकंमेणीयंरक्षन ५३
मुपब्रुवेब्रवीमि॥हेद्यावापृथिवीद्यावापृथिव्योर्द्विवचनंभावश्छांदसः॥इदंमदीयंवचनंनित्य
मस्तु॥किंतद्वचनमित्यपेक्षयामाह॥भूतमिति॥अर्वाभिः॥अस्मद्दीयैरक्षणेनसहदेवानांसर्वे

षांसुराणांमिदमुपलक्षणंसर्वेषांभूतानांमित्यपिज्ञेयं॥अवमेरक्षकेयुवामितिशेषः॥भूतंभ
वंतंअस्मदादेःदेवानांचरक्षकंकंभवंतमितियद्वचनंतत्॥सत्यमस्तित्यन्वयः॥वयमपिभ
वद्यसादात्पूर्वंभवंतंजिनंपापवर्जिनंजीवदानुंजीवंबंधनात्रिद्यामलभेमविद्यालाभेस्वयं
पापवर्जिनंभोक्तुंस्वापनिवर्तनंकंजीवनोपायंयद्भवंतंलभेमहीत्यर्थः॥इतःपरमाकाशादित्याद
यः॥पुराणश्लोकाःस्वप्नार्थंःदानांसंध्याकर्मसाद्गुण्यार्थंसर्वजनपदवर्तिनोब्राह्मणेभ्यःशुभं
प्रार्थयते॥भवरात्रिवत्तन्नामकीर्तनपुरःसरंभगवतींवरदेवतांप्रणमतीति॥चतुःसागरप
र्यंतमितिवाक्यार्थः॥स्पष्टएव॥अथवाचतुःसागराणांचतुष्टयसंख्यासप्तत्वंव्याप्याआपि
पल्लक्षिन्यंकतथाचसप्तसागरमध्येयेसागराःयेचब्राह्मणाःतेभ्यस्त्वाभ्यश्चशुभेभ्यःदानद्रव्यवा
र्थः॥संपत्प्रदंनिवर्णयंति॥अपरेनुयथाभुनार्थमेवभवंतंश्रवणंयंति॥अथवाभवंतंपदस्यस्थाने ४
वचनव्यत्ययेननमःस्वस्त्यादिनाचतुर्थी॥अन्येतुभवंतंपदस्यहितार्थंवाचिन्वानं॥तथागे

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

नहितयोगेचेतिसूत्रेणचतुर्थीवर्णयंतिभोजनंपरंननुपरवचनेहभगवतीवाग्देवीसंध्यं
त्वामितिशेषः॥अभिवादयेनमस्कुर्वेआत्मनेपरमितिकेचिद्व्याचक्षुः॥तन्त्वत्यंताविस्मितपूर्व
वाचः॥तथाहिउत्तमशिखरदत्तयेवदेवीभगवतीभरुछापितांकुरेणमभिवादनंविनियुंक्ते॥
त॥तात्पर्यंतएवंसंध्याकल्पेऽपश्यंकिंचनेत्वनधीतस्मृतिवचनाः॥तथाहिचंद्रिकायांअंतथा
दोनमस्कृत्यगोत्रप्रवरपूर्वकंइतिनमस्कृत्वास्तुध्वेत्यर्थः॥आत्मपादौचभूमिंचस्पृष्ट्वेति
वचनात्॥नक्षत्रंचतथासूर्यंहिजानथभिवादयेत्॥विनापुत्रंचशिष्यंचरोहिणंवाहितुंप
तिंएवंवचोभिःसंध्यादेवताभिवंदनस्यानुक्तत्वात्॥द्विजाद्यभिवादनस्थेवोक्त्वाचतद्भि
वादनंप्रस्तुत्यवाक्यार्थःसंध्यायामपिपुनरभिवादनमस्तितिमाधु॥इतिचतुर्थीगुच्छः
॥इतिद्वितीयसंध्याभाष्यसमाप्तः॥शाके१७७९नलनामसंवत्सरे॥केळकरोपनामकविश्व
नाथभट्टात्मजगणेशभट्टेनलिखितंसमाप्तं॥ ७. ७. ७. ॥

Dr. BHAU DAJI